# Ramayana Sarasangraha Raghuvira Stavah

# રામાયણસારસઙ્ગ્રહરઘુવીરસ્તવઃ

## Document Information

Text title : Ramayana Sarasangraha Raghuvira Stavah by Neelakantha Dikshita

File name : rAmAyaNasArasangraharaghuvIrastavaH.itx

Category : raama, nIlakaNThadIkShita

Location : doc_raama

Author : Nilakantha Dikshitar

Latest update : March 13, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 13, 2022

*sanskritdocuments.org*

# રામાયણસારસઙ્ગ્રહરઘુવીરસ્તવઃ

વેધોવિતીર્ણવિશદાન્નવિવર્તતાં સ્વા-
મપ્રસ્મરન્ રઘુપતે કુલતન્તુમસ્ય ।
મન્યે ররক্ষিय વિભીષણમપ્રમત્તો
નિઃશેષયન્નપિ કુલં રજનીચરાણામ્ ॥ ૧॥

યજ્ઞં રરક્ષિથ મુનેર્યદિ કૌશિકસ્ય
યજ્ઞાત્મનસ્તવ તુ તાં વિદુરાત્મરક્ષામ્ ।
કીર્તિં યદીચ્છસિ કૃતાર્થય મામનાથં
કાકુત્સ્થ વીર કરુણામસૃણૈરપાઙ્ગૈઃ ॥ ૨॥

આરોપિતં પ્રથમમેવ ધનુઃ પુરારે-
ર્યન્નિષ્ક્રયં નિગમવાચ ઉદાહરન્તિ ।
આત્મૈવ ભૂમિતનયાપ્યનપાયિની તે
માનુષ્યકાભિનયમાત્રમિદં તદૂહે ॥ ૩॥

તેજોનિધૌ ત્વયિ સમુદ્ર ઇવોદબિન્દુ-
સ્તેજો યદિ સ્વયમલીયત ભાર્ગવસ્ય ।
કિં તાવતા ત્વયિ રઘૂદ્વહ પૂર્ણમાસીત્
કિં ત્વેષ તાપસવટુઃ કૃપણો બભૂવ ॥ ૪॥

રાજ્યાભિષેચનવિધિઃ શિરસિ પ્રસક્તઃ
પિત્રાજ્ઞયા પરિહતોઽપ્યસકૃત્ત્વયાયમ્ ।
કાકુત્સ્થ પર્યવસિતસ્તવ પાદુકાયાં
કીર્તિસ્તુ ધીર ઇતિ પૂરયતિ ત્રિલોકીમ્ ॥ ૫॥

આજ્ઞા ગુરોરહૃદયામપિ સાધયિષ્યન્
સત્યવ્રતપ્રિયતયા વિપિનં ગતસ્ત્વમ્ ।
બ્રહ્માર્પણોપહૃતકર્મફલોઽપિ લોકે-
ર્ગૃહ્ણીય નાહમિતિ કિં મુનિમાત્થ મિથ્યા ॥ ૬॥

શત્રોઃ ખસારમુપલબ્ધવતઃ સ્ફુટં પ્રાક્
 શઙ્કે તવાજનિ કિયાનયમિત્યવજ્ઞા ।
નો ચેચ્ચતુર્દશસહસ્રિકયા ભટાનાં
 પ્રાપ્તં દ્વિષં વ્યજયથાઃ કથમેક એવમ્ ॥ ૭॥

નેતુસ્તવાપિ જગતામભવત્ કદાચિ-
 ન્નેતા વિરાધ ઇતિ નાથ યથા તથૈવ ।
વ્યામોહયન્નપિ જગન્નિજમાયયા ત્વં
 વ્યામોહિતોઽસિ હરિણેન હિરણ્મયેન ॥ ૮॥

તત્તત્ફલઃ સ સ વિધિઃ સકલાસ્તુ લોકાઃ
 સ્વાત્માનુચિન્તનવતઃ સુલભા ભુવીતિ ।
વ્યક્તં જટાયુષિ ચિરાદ્દિવમેવ સર્વાં
 કાકુત્સ્થ લબ્ધવતિ તે ઘટિતામપાઙ્ગૈઃ ॥ ૯॥

હત્વા કબન્ધમટવીમભિપર્યટન્ ય-
 ચ્છ્રાન્તઃ ક્ષુધા બુભુજિષે સદને શબર્યાઃ ।
ત્વય્યેકમાત્રકબલાર્પણજં ફલં વા
 ભુઙ્ક્તામિયં કથમલં ન જગન્તિ યસ્ય ॥ ૧૦॥

મર્ત્યાત્મતામભિનિનીષસિ ચેતવસ્તુ
 મર્ત્યેષુ કિં ભુવિ ન સન્તિ પરાવરજ્ઞાઃ ।
બોદ્ધું સ્વતોઽપિ નિલયં તદરેર્વિનૈવ
 દૈન્યં રઘૂદ્વહ કિયત્કિયદન્વકાર્ષીઃ ॥ ૧૧॥

એકેન સપ્ત ચ તરૂનિષુણાપવિધ્યન્
 પાદાગ્ચલેન દશયોજનમસ્થિ ધૂન્વન્ ।
મધ્નન્ સુતં મુરપતેરપિ લીલયૈવ
 કિં મન્યસે મનુજતા પ્રકટીકૃતેતિ ॥ ૧૨॥

પ્રસ્થાપિતા મૃગયિતું રવિજેન સીતાં
 દૂતાઃ સમં રઘુકુલોદ્વહ યદ્યપીમે ।
ભારસ્તથાપિ નિહિતો ભવતાઞ્જનેયે
 કસ્તાં પરાં ચિતમબૈતુ પરઃ શિવાંશાત્ ॥ ૧૩॥

દૃષ્ટ્વાભિલપ્ય પરિતોષ્ય ચ સેવયા ત્વં

નાબોધિ યત્સુખમબોધિ તદાત્મતત્વમ્ ।
યદ્દર્શનોદ્યમત એવ હનૂમતા તાં
ત્વત્તોઽપિ સેવ્યચરણાં ક્ષિતિજામુપાસે ॥ ૧૪॥

ઉત્તીર્ય સિન્ધુમુપલભ્ય સુતામવન્યાઃ
નિર્દગ્ધશાત્રવપુરો નિહતારિસૈન્યઃ ।
બ્રહ્માસ્ત્રતોઽપિ હનુમાનભવન્ન બદ્ધઃ
કિં વિશ્વમાતૃભજનાત્પરતોઽપિ બન્ધઃ ॥ ૧૫॥

નિત્યં સુષુપ્તિષુ પરિષ્વજસે ન રામ
ભૂતાનિ કિં નિખિલભૂતગૃહાશયસ્ત્વમ્ ।
આસાદ્ય તત્પ્રકટમર્થમવાપ કીર્તિ-
માચન્દ્રતારવિમલામનિલાત્મજન્મા ॥ ૧૬॥

સિન્ધું વિશોષયિતુમાદદિષે કિલેષું
પ્રજ્વાલિતે શયનવેશ્મનિ પાવકેન ।
કાન્તાસખઃ ક્વ વિહરિષ્યસિ તાત પશ્ચા-
દિત્થં હિ નામ ધિષણાં જહતિ સ્મરાન્ધાઃ ॥ ૧૭॥

સ્વૈરં તરન્ત ઇતરાનપિ તારયન્તિ
પ્રાગ્ચસ્ત્રિલોકગુરવો ગતશોકહર્ષાઃ ।
ઇત્યાહુરાગમવિદો યદિદં ત્વદીયે
સેતૌ નિરૈક્ષિષિ ચિરાય મહોપલેષુ ॥ ૧૮॥

ત્વામેવ નાથમુપયાતયતોરરાતેઃ
સોદર્યયોઃ સમમવિન્દત રાજ્યમેકઃ ।
અન્યા તુ નિષ્કરુણમેવ વિરૂપિતાસી-
દીદૃગ્વિધાનિ હૃદયાનિ મહેશ્વરાણામ્ ॥ ૧૯॥

હસ્તે વિલગ્નમપિ રાવણમાદ્યયુદ્ધ
દેવો મુમોચ દયયેતિ પરિષ્ટુવન્તિ ।
ત્વાં બાલિશાસ્તનુભૃતો ન તુ તેઽવયન્તિ
નિઃશેષરાક્ષસવધાભિનિવેશરૌક્ષ્યમ્ ॥ ૨૦॥

નાગાસ્ત્રબન્ધપરુષાં સ્મર નાથ વેલા
કીદૃગ્વ્યથા તવ તદાસ કિયદ્ધિયેતિ ।
નિત્યા દશા ચલતિ સા ભવન્ધિતો મે

જ્ઞાતવ્યથે સકરુણે કિમિતો વદેયમ્ ॥ ૨૧॥

સભ્રાતૃબાન્ધવસુતં સબલં સભૃત્યં
લઙ્કેશ્વરં ત્વયિ જિઘાંસતિ લબ્ધબોધઃ ।
આગઃ પ્રમાર્ષ્ટુમવિચાર્ય વરાર્પણોત્થં
સ્વાસ્ત્રં ગતસ્તમવધીત્સ્વયમેવ વેધાઃ ॥ ૨૨॥

અગ્નૌ વિશેતિ શબરીશરભઙ્ગયોર્ય-
દાજ્ઞામવાસ્ત્વમનિષિધ્ય ગિરાપિ કિંચિત્ ।
દૃષ્ટા તતો રઘુપતે દયિતા ત્વયાપિ
જ્વાલાકલાપજટિલં જ્વલનં વિશન્તી ॥ ૨૩॥

અબ્જૈવ સા પ્રથમતો ધરણેસ્તતોઽભૂ-
જ્જાતા તતો જ્વલનતોઽપિ યતસ્તદૂહે ।
સર્વાગમાન્તપરિઘુષ્ટસદાખ્યમૂર્ત-
ભૂતત્રયાવતરણાદભવત્સતીતિ ॥ ૨૪॥

દત્તાં પુરૈવ જનસંસદિ પાટુકાયૈ
રાજ્યશ્રિયં પુનરુપેત્ય યદગ્રહીસ્ત્વમ્ ।
દત્તાપહારરસિકેન તતસ્ત્વયૈષા
દત્તાપિ દેહિષુ મૃષૈવ રઘૂદ્વહ શ્રીઃ ॥ ૨૫॥

દાતા બભૂવિથ કપીન્દ્રવિભીષણાભ્યાં
સ્વં સ્વં પદં ત્વમનુમત્ય યતસ્તતોઽહમ્ ।
મહ્યં મદીયમપિ તાત્ત્વિકમેવ રૂપં
કિઞ્ચિત્ પ્રદર્શ્ય ભજ કીર્તિમિતિ સ્તુવે ત્વામ્ ॥ ૨૬॥

મિથ્યાપવાદકલયાપિ વિહાય શુદ્ધઃ
સદ્યઃ પ્રિયાં સુદૃઢમાત્મનિ સમ્પ્રરૂઢે ।
સ્વામિન્ જગજ્જનયિતૃત્વમૃષાપવાદે
સ્મરં પ્રવર્તયસિ કિં ભવમીદૃશં નઃ ॥ ૨૭॥

લઙ્કારણોપહૃતરાક્ષસરાજકોઽસૌ
વિપ્રાર્ભકં તુ કમપિ ત્વયિ લિપ્સમાને ।
પ્રાતિસ્વિકં પ્રતિનિધિં પુનરાચકાઙ્ક્ષ
કાલસ્તપસ્વિનમહો વૃષલં કઠોરઃ ॥ ૨૮॥

પ્રાન્તે ક્વચિદ્ધિમગિરેર્હિમવર્ષદગ્ધે
    પ્રાપ્તં શ્રમેણ મહતા ભરતેન રાજ્યમ્ ।
પશ્યન્ ભુવં ચ લવણસ્ય કનિષ્ઠલબ્ધાં
    સૌમિત્રિરૈહત ન રાજ્યકથાં સુમેધાઃ ॥ ૨૯॥

પ્રાચેતસગ્રથિતકાવ્યનિવેદ્યમાન-
    નિઃસીમભવ્યચરિતાપિ ભવન્નિદેશાત્ ।
યા પ્રત્યયાય યતતે સ્મ સતાં સમક્ષં
    સાવિન્દત પ્રકૃતિમેવ સુતા ધરણ્યાઃ ॥ ૩૦॥

પ્રસ્થાપ્ય ભૂમિતનયાં પરમં પદં પ્રાક્
    સૌમિત્રિમપ્યનુપદં ભુજગાવતારમ્ ।
સદ્યસ્ત્યજન્નિવ દિવં ગમયન્નુપાયાત્
    સજ્જીચકર્થ શયનીયમિતિ પ્રતીમઃ ॥ ૩૧॥

દ્યૌરર્પિતા ખગવરાય મહોપકર્ત્રે
    દત્તં પદં તદધિકં વિષયાશ્રિતેભ્યઃ ।
નામાપિ તે સકૃદકીર્તયતે તુ મહ્યં
    સાયુજ્યમેવ રઘુપુઙ્ગવ દાતુમર્હમ્ ॥ ૩૨॥

સત્યપ્રિયાય શરણાગતવત્સલાય
    સર્વાપદાં પ્રશમનાય સકૃત્પ્રપત્ત્યા ।
શ્રીરામનામપરિપૂતજગત્ત્રયાય
    સીતાસખાય પુરુષાય નમો નમસ્તે ॥ ૩૩॥

ઇતિ શ્રીમદ્ભરદ્વાજકુલજલધિકૌસ્તુભ-શ્રીકણ્ઠમતપ્રતિષ્ઠાપનાચાર્ય-
ચતુરધિકશતપ્રબન્ધનિર્વાહક શ્રીમન્મહાવ્રતયાજિ-
શ્રીમદપ્પય્યદીક્ષિતસોદર્ય-શ્રીમદાચ્ચાદીક્ષિતપૌત્રેણ
નારાયણદીક્ષિતાત્મજેન શ્રીભૂમિદેવીગર્ભસમ્ભવેન શ્રીનીલકણ્ઠદીક્ષિતેન
વિરચિતાસુ કૃતિષુ રામાયણસારસઙ્ગ્રહરઘુવીરસ્તવઃ સમાપ્તઃ ॥

Proofread by Rajesh Thyagarajan

*Ramayana Sarasangraha Raghuvira Stavah*

pdf was typeset on March 13, 2022

Please send corrections to *sanskrit@cheerful.com*